No. १४६२

Title जागदीशी सामान्य लक्षणं

Author जगदीश भट्ट.

Extent १९ Age x

Subject न्याय वैशेषिकं

✓

जागदीशी सामान्यलक्षणम्

१५६२

नम्बर ११०

२६०० स्रा मनलखमा जगदीसी

केव· १ आ·

॥श्रीशिवौ॥ परिस्कुरुतइति॥ तेष्वप्रसिद्धिनिबंधनस्यासंभवस्याविशेषणांतरप्रक्षेपेणावारणमेवास्य परिष्कारः।
नचेहतथेति॥ आकाशावत्ताकाशाभावस्यनप्रतीतिराकाशवत्तस्यवाप्रसिद्धत्वात्‌ इत्यर्थः। अथान्यप्रमेयत्वाद्य
भावाभावत्वमपिगगनादेः स्यादविशेषादिति भावः॥ ननुप्रतियोगित्वान्यथानुपपत्त्यैव गगनस्यस्वाभावाभा
वत्वंसेत्स्यतीत्यत आह॥ अभावप्रतियोगित्वमिति॥ उक्तमिति॥ अभावविरहत्वस्य प्रतियोगितावि भेदप्रतियो
गितत्वावच्छेदकयोरव्याप्यतिव्याप्त्यापत्तेरितिभावः॥ ननुयोयदत्यंताभावस्यप्रतियोगी सोऽवश्यंतदभावाभावइति
सामान्यव्याप्त्यागगनाभावप्रतियोगित्वहेतुनैव गगनस्यस्वाभावाभावत्वंसाधनीयं। अत आह अभावप्रतियोगित्व
मिति। अत्यन्ताभावप्रतियोगित्वमित्यर्थः। तेन भेदस्यप्रतियोगिनि तद्व्यभिचारः॥ अप्रयोजकमिति। यत्त्वतत्त्वयो
रननुगतत्वादित्यर्थः॥ तत्किंवृत्तिमत्पदविफलमेवेत्यत आह॥ एवंचेति॥ तथाच ——— द्विमग्रंथइतिन्यायात्‌ संबं
धविशेषावच्छिन्नप्रतियोगिताकाभावार्थमेव वृत्तिमत्पदमिति भावः॥ तस्याः पुनराकाशाभावीयद्यपि विशिष्टाभावा

घात्मकस्यप्रतियोगिस्वरूपाभावस्यप्रतियोगीतथापिविशिष्टाभावाद्यात्मकः स्वप्रतियोगिस्वरूपाभावोपितद्वृत्ति
मान्नप्रतियोग्यनधिकरणावृत्तिमान्नः वृत्तिमत्पदेनप्रतियोग्यनधिकरणावृत्तित्वस्यैवोक्तत्वात् ।। इत्येवंमूलंव्या
चक्षाणाः ।।।। नस्यस्वाभावाभाववत्त्वविरहेपिनमूलस्यग्रंथासंगतिरित्याहुः ।। संबंधनिवेशस्यफलमाह ।। अत्रतु ए
वेति ।। ज्ञानस्यसमवायेनाभावप्रतियोगित्वेपिविषयतयाकेवलान्वयित्वमितियोऽत्रनान्वचज्ञानंसर्वगोचरं
ग्राह्यं ।। तत्तन्मात्रविषयतासंबंधेनसर्वत्रासत्त्वात्तस्यालक्ष्यत्वादितिध्येयं ।। साक्षात्संबंधेनकेवलान्वयित्वमु
क्तापरंपरासंबंधेनतमाह ।। ज्ञानत्वस्येति ।। समवायेनाभावप्रतियोगित्वेपिस्वाश्रयविषयत्वरूपपरंपरासंबंधे
नकेवलान्वयित्वमित्यन्वयः ।। स्वाश्रयविषयत्वादिसंबंधस्यवृत्त्यनियामकतयातादृशसंबंधावच्छिन्नप्रतियो
गित्वाप्रसिद्ध्यातत्संबंधेनज्ञानत्वादेः केवलान्वयित्वासंभवमतुरुच्याहज्ञानविषयत्वादेश्चेति ।। आदिना ।।।।
नाद्यभावस्यसंग्रहः ।। तेनविषयभेदेनविषयतायाश्चनतु ।। तत्वेनस्यलक्ष्यत्वेपिनक्षतिः वक्ष्यमाणावच्छेदक ।।

२ मल्लक्षणाभिप्रायेणज्ञानविषयत्वस्योपादानमित्यपिकश्चित्॥व्यधिकरणेतूपलक्षणं समानाधिकरणका
लिकादिसंबंधेनापि गगनादेर्ज्ञानविषयत्वादेरभावसंभवादितिध्येयं॥वस्तुतस्तुकेवलान्वयिताघटकात्यसमा
नाधिकरणसंबंधावच्छिन्नायाएवप्रतियोगितायानिवेशप्यत्वान्नसमवायेनज्ञानादेरभावमादायाव्याप्तिरतस्त्वा
हा॥ज्ञानविषयत्वादेश्चेति॥आदिनाज्ञानादेरुपग्रहः।संयोगाद्यभावेति॥यद्यपिप्रमेयत्वादेरपिवैशिष्ट्याद्यवच्छिन्ना
भावप्रतियोगित्वादसंभववारणायद्रूपेवक्तुमुचितंतथापिविशिष्ट्याद्यमतिविशिष्टाभावादेर्नविशिष्ट्यादिप्रति
योगित्वकमिति।प्राकांमतेनवैशिष्ट्याद्यनवच्छिन्नाभावप्रतियोगित्वनिवेशाभिप्रायेणवासंयोगाद्यभावानुसरणं
॥प्रतियोग्येति।प्रतियोग्यनधिकरणवृत्तित्वेनेत्यर्थः॥तथाचस्वावच्छेदकसंबंधेनस्वाश्रयानधिकरणवृत्त्यभावी
यत्तत्संबंधावच्छिन्नप्रतियोगित्वाभावस्यवतत्संबंधेनकेवलान्वयित्वमितिफलितं।तेनघटाद्यभावस्यैवघटादि राम०
विशिष्टवाच्यत्वाद्यभावत्वमतेपितत्प्रतियोग्यनधिकरणवृत्त्यभावस्याप्रसिद्धिः॥स्वपरस्यापिमप्रतियोगिताप २

रत्वादितिध्येयं।ननुगगनस्याधिकरणाप्रसिद्ध्यातदभावस्यप्रतियोगिवैयधिकरण्यविरहात्तादृशघटाघभा
वस्याप्रतियोगित्वंगगनस्यापीतितत्राप्रतियोग्यव्याप्तिः।।स्वरूपसंबंधात्मकप्रतियोगित्वस्यप्रतियोगिभेदेनैवविभिन्न
तयाद्रव्यसामान्याभावीयस्यापिगगननिष्ठप्रतियोगित्वस्यतथात्वात्तदाश्रयस्यगगनस्याधिकरणाप्रसिद्ध्याऽभा
वविरहात्स्वरूपप्रतियोगित्वस्यलक्षणाघटकतयागगनादेर्द्रव्यसामान्याभावाभाववत्त्वविरहेणतत्प्रतियोगित्वा
संभवाच्चातआह।आकाशाभावोपीतितथाचयादृशसंबंधसामान्येयद्वत्प्रतियोगिताश्रयप्रतियोगिकत्वयत्कि
चिदधिकरणानुयोगिकत्वोभयाभावस्तत्तत्प्रतियोगित्वाभावकूटवत्त्वंतादृशसंबंधेनकेवलान्वयित्वंवाच्यं।ग
गनस्यतुतादृशप्रतियोगितावत्त्वात्केनापिसंबंधेनतस्यकेवलान्वयित्वमितिभावः।।उभयाभावस्यप्रवेशेन
लाघवंवृत्तिमत्त्वदसार्थक्यंचकुर्वन्नाहवृत्तिमतइति।।तादृशेति।प्रतियोगिव्यधिकरणेत्यर्थः।।तथाचययाऽक्ष
तमेवप्रतियोगिवैयधिकरण्यंवृत्तिमत्त्वविरहादेवगगनादौनातिप्रसंगः।वृत्तिमत्त्वंचकेवलान्वयिताघटकसं

३ बंधेनसामान्यंयेनसमवायेनवृत्तिमतोघटात्वादेःसंयोगसंबंधेनप्रतियोगिव्यधिकरणाभावप्रतियोगित्वेपिनतस्यसंयो
3 गेनकेवलान्वयित्वंयदिचज्ञानत्वादेःस्वाश्रयविषयत्वादिसंबंधेनैववृत्तिःप्रमेयत्वादिसंबंधेनापिकेवलान्वयित्वमेक
शेषस्यदुष्करत्वात्तथापितत्तत्संबंधेनप्रतियोगिव्यधिकरणाभावाप्रसिद्ध्यातत्राव्याप्तिरितिविभाव्यतेतदायत्सं
बंधावच्छिन्नपदनिष्ठस्यप्रतियोगिव्यधिकरणाभावस्यप्रतियोगित्वाभाववत्त्वावच्छेदेनप्रतियोगिव्यधिकरणा
भावप्रतियोगित्वाभाववत्त्वंतत्संबंधेनतत्केवलान्वयीतिवक्तव्यंप्रतियोगितावद्रूप्यंचतत्रविशेषणताविशेषा
वच्छिन्नंसामान्यमतोनकश्चिद्दोषइतिध्येयं॥अव्याप्यवृत्तित्वेति।तथाचगगनाद्यभावोव्याप्यवृत्तिरेवेतितस्यगगनेऽप्रसि
संग४।संयोगस्वरूपस्याभावोनतथेतितत्प्रतियोगित्वेपिसंयोगाद्यभावेनाप्रसंगः॥इतिभावः॥अत्राव्याप्यवृत्तित्वंय
दिस्वावच्छिन्नवृत्तिकान्यत्वंतदासंयोगस्यकेवलान्वयित्वापत्तिस्तदभावस्यावच्छिन्नवृत्तिकत्वात्तच्चनिरवच्छिन्नवृ राम०
त्तिकत्वमेवव्याप्यवृत्तित्वंग्राह्यंअवच्छेदकत्वादिसंबंधेनमूलादौनिरवच्छिन्नवृत्तिकस्यसंयोगादेःप्रतियोगित्वेनसंयो ३

गाद्यभावेऽव्याप्तितादवस्थ्यान्नच विशेषणताविशेषणानिरवच्छिन्नवृत्तिकत्वं तथा घटत्वाद्यभावस्यापि केवलान्व
यित्वापत्तिः। घटत्वादिस्वरूपस्य तदभावस्य विशेषणतया वृत्तित्वविरहात्। इत्यस्वरसः॥ केचिदित्यतयास्वरसितः॥
ननु वृत्तिनियामकेन स्वविषयतादात्म्यादिसंबंधेन प्रतियोग्यधिकरणत्वप्रसिद्ध्या तेन संबंधेन नित्यज्ञानादेर
भिधेयस्य सतः केवलान्वयित्वं स्यादत आह॥ तादात्म्येनेति॥ स्वविषयतादात्म्येनेत्यर्थः॥ यथाश्रुते त्वभिधे
यमात्रस्यैव तज्ज्ञानव्यक्तित्वावच्छिन्नभेदप्रतियोगितया तादात्म्येन न कस्यापि त्वभिधेयस्य यावद्वृत्तित्वं कुत्राप्य
सिद्धेराशंकास्यादिति ध्येयं॥ न त्वास्त॥ तथा चेत्यग्रिमग्रंथोत्तरमेवायं पाठः॥ तथा च न वक्ष्ये दकगर्भलक्षणाक
रणेऽभिधेयत्वादिप्रकारेण कस्यकमात्रस्यैव तादात्म्येन केवलान्वयित्वसंभवादिति प्राहुः॥ अखिलमिति॥ प्रति
योग्यसमानाधिकरणेत्यत्र प्रतियोग्यसंबंधित्वं वृत्तिमत्त्वमित्यत्र च संबंधतामात्रमत्रतत्ताभाववत्त्वादिकं च न प्रविष्ट
मिति भावः॥ मूले प्रमाज्ञातीयेति॥ घटत्वाद्येकतरप्रमामुपादाय भ्रमसामान्यभिन्नत्वेन तत्सजातीयस्य ज्ञानस्य

४ विषयत्वमेव प्रमेयत्वं वा अभिप्रेत इत्यर्थः ॥ प्रमात्वाजातीयविषयत्वोऽस्यापि न प्रतियोगित्वगर्भत्वलक्षणस्य प्रतीकारो विषयभे
5 देन विषयत्वस्य नानात्वात् ततः प्रमात्वाजातीयत्वेन अननुगमं कुर्वीणस्य सकलकृतौ ऽवच्छेदकगर्भलक्षणे तात्पर्यमित्यवधा
र्यमाचष्टे ॥ तथा चेति ॥ अत्र गुरुधर्मस्यापि प्रतियोगितावच्छेदकत्वोपगमात् न प्रमेयधूमवत्त्वादिप्रकारेण धूमादेः केव
लान्वयित्वसिद्धान्तलक्षणोक्तरीत्या प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वमेव वा तदवच्छेदकत्वं वाच्यं दूष्यं चेति ॥
अवच्छेदकत्वनिवेशे चेत्यर्थः ॥ तेनेति ॥ अन्यथा द्रव्यभेदगुणभेदोभयत्वावच्छिन्नाभावस्य प्रतियोगिसमानाधि
करणत्वात् तदसमानाधिकरणस्याभावान्तरस्य प्रतियोगितानवच्छेदकमेव तादृशोभयत्वमिति तादृश्येणापि के
वलान्वयित्वं स्यादिति भावः ॥ वृत्तिमत्त्वस्यादि द्वितीयमतमालंब्य आशंकते मंचेति ॥ वाच्यमिति परेणान्वयः ॥ ए
वमिति ॥ प्रतियोगितावच्छेदकावच्छिन्नस्यासमानाधिकरणप्रवेशादित्यर्थः ॥ यथा कृतेऽपि विरुद्धयोर्धर्मयोरपि प्र राम०
तियोग्यनधिकरणवृत्तिप्रसिद्धाभावप्रतियोगित्वेनैव अतिव्याप्त्यसंभवादिति भावः ॥ तादृशधर्मावच्छिन्नस्येति ४

रुक्तप्रतियोगितानवच्छेदकावच्छिन्नस्येत्यर्थः॥ विवक्षितत्वादित्यस्य वृत्तिमत्पदेनेत्यादिः। तस्यापि विरुद्धगोत्वाश्व
त्वाद्युभयत्वस्येत्यर्थः॥ अत्र तथात्वात्· यत्किंचिद्व्यक्तिवृत्तितानवच्छेदकत्वात्· वस्तुतोऽत्रापि यत्संबंधेन यद्रूपावच्छि
न्नस्याधिकरणे वर्त्तमानस्याभावस्य दैशिकविशेषणतावच्छिन्नप्रतियोगितानवच्छेदकसामान्यं दैशिकविशेषणा
तावच्छिन्नप्रतियोगितानवच्छेदकं तत्संबंधेन तद्रूपावच्छिन्नं केवलान्वयीति वक्तव्यं अन्यथा स्ववृत्तिप्रमेयत्वादि
संबंधेन प्रतियोगितावच्छेदकावच्छिन्नस्याप्यधिकरणस्याप्रसिद्ध्या तादृशसंबंधेन केवलान्वयिभिन्नज्ञानत्वादावुक्तलक्ष
णाव्याप्तिप्रसंगादिति ध्येयं॥ ननु संशयस्यानुपयुक्तत्वात्तथापीत्यादिमूलस्यासंगतिरत आह॥ संदिग्धेति॥ तथा
च सिद्धिदशायामनुमितेर्वारणाय पक्षताविधयैव संशयस्योपयोग इत्याशंकितुरभिप्रायः॥ कालसंबंधित्वरूप
स्याप्तित्वस्य केवलान्वयित्वात्तन्मात्रसाध्यकस्यान्वयव्यतिरेकित्वं मूलोक्तमसंगतमतो व्याचष्टे॥ घटास्तित्वेति॥ साध्य
संशयस्य तन्निश्चयं प्रत्यविरोधित्वात्· व्याचष्टे साध्यसिद्धीति॥ तथा च मूले साध्यसिद्ध्यायो विरोधः प्रतिबंधकत्वहानि

५ त्यन्वर्थः ॥ ननु साध्यसिद्धिविरोधिनीयस्येति बहुव्रीहिः ॥ परपदे पुंवच्चायोगात् कप्रत्ययाभावाच्च साध्यसिद्धिपदं च सा-
ध्यधर्मिकपक्षवृत्तित्वनिश्चयपरं नातः केवलान्वयिसाध्यस्याभावाप्रसिद्ध्या साध्याभावाप्रकारकसाध्यप्रकार-
कज्ञानपर्यवसितायाः साध्यसिद्धेः पुनरप्रसिद्धितादवस्थ्यादिति भावः ॥ ननु साध्यं पक्षवृत्ति न वेत्यादिसंशयस्या-
संग्रहो भिन्नप्रकारतया तस्य साध्यवत्त्वनिश्चयानिवर्त्यत्वात् अतः प्राचीनमतेनञुपतिविशेषणेत्यादि। भेदेपीत्य-
पिना प्रमेयत्वं पक्षवृत्त्यभावप्रतियोगि न वेत्यादिमूलोक्तविषयभेदस्यापि संग्रहः विरोधीति। विरोधिनी तत्तत्सं-
शयानुत्पत्तिप्रयोजिकाया विषयता तन्मात्रयोगेत्यर्थः ॥ ननु विरोधिनो विषयतामात्रेणेत्यर्थः ॥ तथा सति प्रमेय-
--त्वं पक्षवृत्ति न वा पक्षवृत्त्यभावीयप्रतियोगि न वेत्यादिसंशयस्य पक्षः प्रमेयत्ववानित्यादिनिश्चयानिवर्त्यत्वे
प्रकृतासंगतिप्रसंगादिति ध्येयं ॥ पक्षनिष्ठाभावाप्रतियोगित्वस्य ज्ञानं न साध्यसाधकं व्याबाधितत्वबुद्धेरनुमि- राम०
त्यहेतुत्वात् हेतुत्वेपि तदभावो न योग्यपत्तेस्तु भयथापि पक्षनिष्ठत्यादिमूलासंगतिरतो व्याचष्टे पक्षेत्यादि। व्याये ५

तदभावस्येत्यत्र तच्छब्देन पक्षवृत्त्यभावप्रतियोगित्वज्ञानस्यैव परामर्शेन सामंजस्यमतो विरोधित्वकक्षायां तत्र
धर्मिमत्त्वभौव्याहप्रतियोगित्वज्ञानविरोधिज्ञानस्येति॥ कथंचिद्बाधापनोदनद्वारा इदं चोभावाभावकृतं विरोधित्वं
स्वानुसृत्यावस्तुतः साध्यधर्मिकपक्षनिष्ठाभावप्रतियोगित्वज्ञानविरोधिनः परामर्शस्यैव साध्यसाधकत्वसंभ
वात्। यथाकृतमेव ज्यायः॥ साध्यसाधकत्वं यथाकृतमेव विवक्षितं — विरोध्यर्थकस्यापि तत्रोज्ञानविरोधित्व
प्रकारेणावोधकत्वेयामाकानिकलक्षणापत्तेः कल्पान्तरमाह॥ पक्षनिष्ठेत्यादि॥ तथा च घटानधिकरणास्मित्यादि
प्रयोग इव पक्षनिष्ठाभावप्रतियोगित्वज्ञानेत्यत्रापि नत्रो वृत्त्या ——— पदेनान्वय इति भावः॥ द्वितीयकल्पे तदा
त्मकस्याभावस्येत्यर्थसंभवेपि उभयकल्पे साधारण्यार्थं प्रकारान्तरमेव पक्षवृत्त्यभावप्रतियोगित्वज्ञानं तच्छब्देन प
रामर्शेत्वाह्यान्तस्येत्यादिषना॥ धर्मान्तरे तादृशप्रतियोगित्वज्ञानदशायामपि साध्यानुमितिः स्फुरति॥ साध्यइति पूरि
तं॥ तादृशप्रतियोगित्वज्ञानप्रतियोगिकाभावमात्रस्य तादृशप्रतियोगित्वनिश्चयदशायामपि सत्त्वादाह॥ प्र

६ 6

तियोगित्वज्ञानत्वेनेति॥ तादृशानिश्चयत्वेनेत्यर्थः। तेन तादृशप्रतियोगित्वसंदेहदशायां नयोग्यताहानिः। नन्वेवं प
क्षः साध्याभाववान्नेत्यादिनिर्णये यद्दशायामयुक्तक्रमेणसंशययोग्यतास्यात् तथा च तत्रापि स्वनुमित्यापत्तिरत आ
ह॥ साध्यविशिष्टेत्यादि। अभावमात्रात्मकस्य व्यतिरेकस्य विपक्षगामित्वशंकानिवर्तकत्वासंभवात्. व्यतिरेकस्ये
त्यादिमूलासंगतिरतो व्याचष्टे विपक्षे हेतोरभाव इति॥ ननु क्वचिद्विपक्षे हेतोरभावग्रहेपि विपक्षवृत्तित्वशंकोत्पा
दात् विपक्षत्वावच्छेदेन हेत्वभाववत्त्वं वाच्यं तच्च व्यतिरेकव्याप्तिपर्यवसितं न स्वात्मिकायां व्यतिरेकव्याप्तावुपयुज्य
त इति तन्मूलासंगतिरतो व्याचष्टे साध्याभावहेत्वभावयोरिति। तथा च व्यतिरेकव्याप्तेः स्वस्मिन्ननुपयुक्तत्वेपि
साध्यान्वयव्याप्तौ व्यभिचारशंकानिरासद्वारोपयोगो भिन्नप्रकारकस्यापि ज्ञानस्य विरोधित्वोपगमादिति भा
वः॥ केचित्तु। व्यतिरेकोयमभावमात्रं व्यतिरेकव्याप्तिर्वा उभयथापि तद्ग्रहेन विपक्षवृत्तित्वशंकानिवर्त्तकत्वं भि राम०
न्नप्रकारकत्वादतो व्याख्यातं विपक्षे हेतोरभाव इति। हेतोर्विपक्षवृत्तित्वाभाव इति तदर्थः॥ व्यभिचारशंकायां न ६

व्यतिरेकव्याप्तिरिति॥ विरोधित्वं भिन्नप्रकारकत्वादत्र तन्निरासद्वारादि विपक्षवृत्तित्वाभावस्य प्रस्तुततरां व्यतिरेकव्याप्त
नुपयोगो न संभवतीत्यतो व्याचष्टे साध्याभाववद्वृत्तित्वाभावयोरित्यादीत्याहुः॥ तच्चिन्त्यं॥ अत्रेति॥ शंकेयं नव्यनैया
यिकानां भट्टादीनां वा तत्गुरूणां तेरनुपाधिकत्वस्यैव व्याप्तित्वस्वीकारात्· अत एव गुरुणां हि व्याप्यतावच्छेदकप्र
कारकज्ञानस्यैवानुमितिहेतुतया प्रायशः साधनभेदभात्यस्मिन् ग्रंथासंगतिरित्यपि परास्तमिति ध्येयं॥ साध्येति
न्नत्र साध्याभावस्याधिकरणत्वं निरवच्छिन्नं ग्राह्यं तेन कपिसंयोगादिसाध्यकस्य तद्वृक्षत्वादेः नासंग्रहस्तदपि वा
केवलान्वयिनां पथि प्रस्थाप्यमित्यवधेयं॥ व्याप्तिरिति॥ प्रकारतयाऽनुमितिजनकतावच्छेदकमित्यर्थः॥ व्याप्ति
र्वा —— शंक्यं· केवलान्वयिनि तु न व्याप्यताव्यवहारोपीत्यपि कश्चित् लाघवादिति॥ पक्षधर्मिकसाध्याभाव
वद्वृत्तिमत्तानिश्चयान्तरानुमितित्वावच्छिन्नं प्रतितादृशनिश्चयत्वेन हेतुतापाम वच्छेदकलाघवादित्यर्थः॥ प
क्षधर्मिकस्वव्यापकसाध्यसमानाधिकरणहेतुमत्तानिश्चयानन्तरानुमितित्वावच्छिन्नं प्रतितादृशहेतुमत्तानिश्चय

८ तेन कारणतायां तु पूर्वापेक्षयावच्छेदकगौरवादिति भावः॥ साध्याभाववदवृत्तित्वावच्छिन्नप्रकारताकनिश्चयत्वे
7 नैकरूप्येणैव धूमालोकादिना तल्लिंगकपरामर्शस्य तादृशनिश्चयान्तरानुमितित्वावच्छिन्नं प्रति हेतुत्वमतः साधन
विशेषणमदेयं लाघवमप्यस्तीत्याह॥ साध्यशून्यादिना॥ साध्याभाववदवृत्तित्वं न साध्याभाववति संबंधसामान्येना
वर्त्तमानत्वं तद्ग्रहेपि पक्षः साध्याभाववदसमवेतत्वान्न साध्याभाववदसंयुक्तो वा न इत्यादिग्रहणादेरसाध्यस्यानु
मितेरनुभविकत्वादेवं च विभिन्नसंबंधेन हेतुमत्तास्थले साध्याभाववदवृत्तित्वमप्यस्माकं नानात्साध्यायेनमा
यशङ्क्योक्तं॥ न च साध्याभाववदवृत्तित्वज्ञानस्य साधनविशेषणमन्तर्भाव्याहेतुत्वे वह्न्यभाववदसंयुक्तधूमवान्
पर्वत इत्यादिपरामर्शस्य धूमवत्तांशे भ्रमत्वग्रहेपि ततः पर्वतो वह्निमान् इत्यनुमितिः स्यादिति वाच्यं॥ इष्ट
त्वात्। यादृशवस्तुविषयकत्वेनानुमितिहेतुत्वं तद्दृष्टितभ्रमत्वग्रहस्यैवानुमितिप्रतिकूलत्वादन्यथा धूमसा राम
मान्यव्यापकवह्निसमानाधिकरणनीलधूमवान्पर्वत इत्यादिपरामर्शस्य नीलांशे भ्रमत्वग्रहदशायां त्वन्मते ७

पित्ताद्दृष्टापरामर्शादनुमित्यनुत्पत्तिप्रसंगात् अत्र पादृशीविषयताव्यक्तिरनुमितिजनकतावच्छेदिका तद्घट
कपदार्थगर्भप्रामाण्यज्ञानस्यैवेतिजनकतयानिरुक्तप्रामाण्यज्ञानस्यापिस्वानुमितिविरोधित्वसंभवान्नतमत्सायाः
साध्याभाववद्वृत्तिधूमत्वावच्छिन्नविषयतायाएवतादृशावृत्तित्वावच्छिन्नविषयतात्वादिति ध्येयं॥ यद्यपिधूमलिंग
कवह्न्यनुमितित्वावच्छिन्नंप्रत्यालोकलिंगकानुमित्सायाः प्रतिबंधकतयातदभावदशायांवह्न्यभाववद्वृत्ति
मान् पर्वतइत्येवंतिस्वयाएपिधूमलिंगकवह्न्यनुमितिप्रसंगः पक्षधर्मिकसाध्याभाववद्वृत्तिधूमवत्तानिश्च
योत्तरानुमितिरेवधूमलिंगकानुमितित्वेनतत्रतादृश्यानुमित्यनुत्पादस्यसर्वसिद्धत्वात्· तथाचतद्वारणाय
पक्षधर्मिकसाध्याभाववद्वृत्तिधूमादिमत्तानिश्चयत्वेनतादृश्यानिश्चयोत्तरानुमितित्वावच्छिन्नंप्रतिहेतुत्वंवा
च्यमितिसाध्याभाववद्वृत्तित्वज्ञानस्यहेतुत्वमतेपिसाधनभेदेनविभिन्नएवकार्यकारणभावस्तथापितल्लिं
गकानुमितौतदन्यलिंगकानुमित्सायाःकामिनीजिज्ञासादिवत्स्वातंत्र्येणप्रतिबंधकत्वेमानाभावइतिमनेन

८ दं पक्षताव्यवहरणमपि वनव्याप्तानां नानुमितिहेतुः। यत्तु व्यालोकादिलिंगकत्रासत्वेपि धूमालोकभयलिंगकपरामर्शाद
४ शायां धूमादिलिंगकानुमितेरुत्पादादालोकलिंगकपरामर्शाभावविशिष्टाया एवालोकलिंगकानुमित्साया धू
मलिंगकानुमितिविरोधित्वं वाच्यं तथा च पर्वतधर्मिकवह्न्यनुमितिसामान्यं प्रति धूमालोकभस्मादिप्रत्येकलिंगक
परामर्शाभावविशिष्टधूमालोकभस्मादिप्रत्येकलिंगकानुमित्सात्वेन प्रतिबंधकमेवत्वं न स्यादिति धूमलिंगकात्व
स्य कार्यतानवच्छेदकत्वात् तदवच्छिन्नस्यापादनमेव दुर्घटमिति॥ तच्चिंत्यं॥ ननु व्यापकसामानाधिकरण्यरूपव्या
प्तेः प्रयोजकत्वे तत्र हेतोर्यादृशः संबंधः प्रविष्टस्तेन पक्षधर्मताज्ञानात् तत्र साध्यस्य यादृशसंबंधो निविष्टस्तेनैव प
क्षे साध्यस्यानुमितिस्तथैव हेतुत्वकल्पनात्। त्वन्मते च नियमः स्यात् तस्मादाह॥ यत्संबंधेति॥ नातिप्रसंगो नैकसंबं
धेन निरुक्तव्याप्यादिग्रहादपरसंबंधेन साध्यानुमितिप्रसंगः। न तूक्तो यावद्व्याप्तिग्रहगतादौ सत्वात् तत्तन्मतेऽपि व्या राम०
प्तिग्रहाधीनं फलं स्यादित्याशंक्य फलं यद्यनुमितिस्तदाकारणताजनकविलंबादेव न तत्संभवद्रूपमाह त्वाकाशादावि ८

ति॥तदभावदशायामनुमितिरिष्यत एवेति भावः॥ पक्षधर्मतेति॥ अत्राकाशस्य तत्त्वेन पक्षधर्मोत्वात्र हेपि साध्या
भाववद्वृत्तित्वेन पक्षधर्मताग्रहसंभवात् व्युत्क्रमेवतत्साधनविशेषणत्वभावेनाक्षिप्रहस्य हेतुतायाः साधन
मेदेपीत्यादिनापरित्यक्तत्वात् इति चिंत्यं व्याप्यत्वव्यवहारस्य फलत्वे त्वाहृनिविशतीवेति॥ तथाच साध्यसामाना
धिकरण्यभिविशिष्टमेवतद्व्याप्यत्वव्यवहारौपयिकं अतोगगनादौ न वह्न्यादिव्याप्यताव्यवहार इति भावः॥ ला
घवादाह वृत्तिमत्त्वंवेति॥ साध्याभाववत्तियेन संबंधेनावृत्तित्वं तेनैव वृत्तिमत्त्वं बोध्यं तेन समवायादिनावृत्तिमति
द्रव्यत्वादौ संयोगादिनात्र वह्न्यादिव्याप्यताव्यवहारः अत्रैवं घतिघटत्वादेः साध्यतायां घटपटोभयत्वादेः पर्याप्ति
संबंधेन कथं न व्याप्यत्वं पूर्वकल्पे तत्संबंधेन साध्यसामानाधिकरण्याभावादेव तस्य वाधितत्वादिति चिंतनीयं भि
न्नत्वादीत्यादिना साध्याभाववदवृत्तित्वात्मंता भावसंग्रहः॥ अभिचारश्रीविरोधितावच्छेदकधर्मघटितत्वेनेत्यर्थः
॥ तेन व्यापकताघियो विरोधित्वखंडकस्य यदीत्याद्युत्तरग्रंथस्यनासंगतिः॥ आनुगमनीयमिति॥ यद्यपि ता दृशमि

९ त्वादिप्रकारकनिश्चयस्यस्वोत्तरानुमितित्वावच्छिन्नंप्रत्येवहेतुत्वात् अननुगमेपिनक्षतिस्तथापिस्वसमानाप्योन्याभा
९ वावच्छिन्नमोघ्यकारणताद्वयकल्पनामपेक्ष्यलाघवात्सुसाध्यव्यभिचारिधीविरोधिविषयप्रकारकपक्षधर्मतानिश्चयत्वे
नतादृशनिश्चयानामनुमितित्वावच्छिन्नंप्रत्येकमेवकारणत्वंयुक्तमित्याशयेनेदंनचैवमितिग्रन्थः॥वह्न्यभावेत्या
दिविषयविरोधविरहाद्विप्रत्यक्षमविरोधित्वेहेतुः॥स्वरूपेणाधर्मान्वयाविशिष्यत्वेनभासमानद्रव्यत्वयथा।तदवच्छेदक
त्वंचेति॥वह्नित्वस्यावच्छेदकत्वंचेत्यर्थः॥निर्वह्नित्वबुद्धौवह्नित्वावच्छिन्नप्रतियोगिताकत्वेनसंसर्गतायांतेषामनुभ
वशादितिभावः।तदवच्छेदकत्वंचेति।प्रतियोगितावच्छेदकत्वंचेत्यर्थः॥विरोधविरहादिति॥समानप्रकारताक
बुद्धौप्रतिबंधकत्वादितिभावः॥विशिष्टस्यमहानसीयत्वादिविशिष्टस्यप्रकारान्तरस्येति।हेतुमन्निष्ठाभावप्र
तियोगितात्वावच्छेदेनव्याप्यतादृशधर्मावच्छिन्नत्वाभावस्तादृशधर्मावच्छिन्नसामानाधिकरण्यंव्याप्तिरित्याद्यनुसरणा रा०म०
दित्यर्थः॥ननुहेतुमन्निष्ठाभावप्रतियोगितानवच्छेदकतापर्याप्त्यधिकरणान्यत्वानुसरणाद्वित्यर्थः॥तथासतिमहा ९

नसीयत्ववह्नित्वयोःपरस्परवृत्तित्वावच्छेदकतापर्याप्त्यधिकरणत्वात्तदुभयभिन्नत्वेन महानसीयत्वविशिष्टवह्नित्व
प्रकारेण धूमादिव्यापकतयातदुरुद्धरत्वापत्तेः। महानसीयवह्नित्वावच्छिन्नाभावस्यापि वह्नित्वावच्छिन्नाभावतयात
द्वृत्तित्वज्ञानस्यापि व्याप्यताज्ञानं प्रति बंधकत्वापत्त्या यस्यावह्नित्वपर्याप्तावच्छेदकताकवह्निनिष्ठप्रतियोगिता
काभाववद्वृत्तित्वस्यैव व्यभिचारतया तज्ज्ञानस्य विषयविरोधसंभवादिति ध्येयं। स्फुटतरामिति। विषयविरोधवि
रहादिति पूर्वेणान्वयः। धूमवन्निष्ठाभावप्रतियोगितात्वावच्छेदेन वह्नित्वावच्छेदकत्वाभावबुद्धौ निरुक्तप्रतियोगि
ताधर्मिकस्य वह्नित्वावच्छेदकत्वग्रहस्यैव विरोधित्वादिति भावः। केचित्तु। प्रकारान्तरस्येति हेतुमन्निष्ठाभावप्रतियोगि
तावच्छेदकतापर्याप्त्यधिकरणघटितान्यलाघवानुसरणाद्युक्तमर्थः। स्फुटतरामिति। निर्वह्निवृत्तिधूमवत्त्वादिप्रती
तौ वह्नित्वान्यधर्मानवच्छिन्नप्रतियोगिताविनैव सं — तयावह्नित्वादाववच्छेदकतापर्याप्तेरप्रवेशादित्यभिप्रायइ
त्याहुस्तच्चिंत्यं। मणिग्रन्थस्य यथाश्रुतार्थासंभावनाभावादिति तदुपलक्षणं निरुक्तव्यभिचारधीविरोधिधीविषय

१० त्वस्य साध्याभाववद्वृत्तित्वविशिष्टहेतुकालीनत्वादावतिप्रसक्तत्वात्· यत्प्रकारताकनिश्चयत्वेन व्यभिचारधीविरोधि
त्वं तत्प्रकारकपक्षधर्मतानिश्चयत्वेनैव हेतुत्वं न चैवं व्यापकसामानाधिकरण्येऽप्यस्ति व्यभिचारबुद्धिं प्रति व्यापकतानि
10 श्चयत्वेन विरोधित्वस्यावश्यकत्वात् तया व्यापकसामानाधिकरण्यनिश्चयत्वेनापि तथात्वे मानाभावादित्यपि द्रष्टव्यं ॥ वस्तु
तो साध्याभाववद्वृत्तित्वांशे भ्रमाभावबोधस्यैवानुमितिहेतुत्वं न तु साध्याभाववद्वृत्तिभिन्नत्वज्ञानस्य तथात्वं साध्याभा
ववद्वृत्तित्ववतां धर्मिणां कारणतावच्छेदकेऽनुप्रवेशे गौरवात्· प्रत्युत साध्यवदन्यावृत्तित्वस्यापि ज्ञानं न हेतुः ॥ साध्य
वतां धर्मिणां प्रवेशेन साध्याभाववद्वृत्तित्वाभावापेक्षया गुरुत्वादित्यत उभयत्रैव नोचितं इति ध्येयं न तु यत्र साध्याभावाद्य
नुपस्थितावपि व्यापकतागोचरज्ञानादेवानुमितिस्तत्र व्यभिचारात्· साध्याभाववदवृत्तित्वज्ञानस्य हेतुत्वं संभवत्येव
नेत्यत आह ॥ व्यापकत्वेति ॥ क्लृप्तकारणं विना कार्योत्पत्त्यसंभवात्· एतादृशस्थले मानाभाव इति भावः ॥ व्यापकसा
मानाधिकरण्यस्य गुरुत्वेऽपि तद्धीर्व्यापकत्वस्य धियः कारणतायां बाधकाभावात् केवलान्वयिखंडनं तु दुर्घटमित्यावश्यं राम० १०

व्यापकत्तेत्यादिग्रंथावतारणं स्तुटं॥ व्यापकत्वस्य साधनभेदाद्भिन्नत्वेन तदपेक्षया साध्याभाववदवृत्तित्वे लाघवस्य
प्रागेव दर्शितत्वेन संदर्भविरोधापत्तेः। व्यापकतावगाहि ज्ञानस्य हेतुत्वे साधकाभावमुक्त्वा बाधकमप्याह। ननु वायौ किं
कमिति॥ अयोगादिति यद्रूपावच्छिन्ने व्यापकतावच्छेदकत्वधीस्तद्रूपावच्छिन्नप्रकारेणैव साध्यस्यानुमितेरस्त्वापि व्या
प्यादित्याशयः॥ अत एवाहस्वरूपेति॥ यद्रूपावच्छिन्ने व्यापकतावच्छेदकत्वं गृह्यते तदनवच्छिन्नप्रकारेणापि साध्य
स्यानुमितौ भानमित्यर्थः॥ ननु तन्मात्रवृत्तिधर्मावच्छिन्नविशेष्यकव्यापकतावच्छेदकत्वग्रहस्य स्वरूपतस्तदवच्छिन्न
विधेयताकानुमितिहेतुत्वा — ति व्यापकतावच्छेदिके तिग्रहेत्यन्नज्ञानवानित्यनुमितिर्भविता जातित्वस्य ज्ञानमा
त्रवृत्तित्वात्·किंतु ज्ञानत्वं व्यापकतावच्छेदकमित्याकारग्रहादेवेत्यत आह॥ अनुभवत्वेति॥ अनुभवत्वं व्यापकता
तित्वं सत्वादौ गुरुत्वव्याप्यजातित्वं च रूपत्वादावति प्रसक्तमतो ज्ञानत्वमात्रवृत्तित्वं रक्षार्थे विशेषणमाहुर्यत्तथा त्व
ग्रहे व्यापकतावच्छेदकत्वग्रहे तत्प्रसंगादिति ज्ञानवानित्यनुमितिप्रसंगादित्यर्थः॥ यद्यपि स्वरूपस्तद्धर्मे विशेष्यक

११ व्यापकतावच्छेदकत्वज्ञानं स्वरूपतस्तदवच्छिन्नविधेयकानुमितौ हेतुः ज्ञानत्वत्वावच्छिन्नधर्मिकं च व्यापकतावच्छेद
कस्य ज्ञानं ज्ञानत्वत्वविशिष्टज्ञानत्वावच्छिन्नविधेयताकानुमितौ हेतुरित्यभिमतेनोक्तदोषः॥ न चैवं ज्ञानत्वत्वेन व्याप
कतानवच्छेदकत्वग्रहदशायामपि ज्ञानवानित्यनुमितिप्रसंगः॥ स्वरूपतो ज्ञानत्वधर्मिकव्यापकतावच्छेदकत्वग्रहस्य
तदानीमपि संभवादिति वाच्यं॥ त्वन्मते निर्वह्निवृत्तिधूमवत्त्वाकारकव्यभिचारधियः सत्वेपि वह्न्यभाववद्वृत्तिमा
नुपर्वतइत्याकारकज्ञानदशायामिवास्माकमपि उक्तज्ञानदशायामिष्टत्वात्॥ ज्ञानत्वत्वावच्छिन्नधर्मिकव्यापकता
नवच्छेदकत्वग्रहस्य तु ज्ञानत्वत्वविशिष्टज्ञानत्वावच्छिन्नविधेयताकानुमितावेव विरोधित्वसंभवात्॥ तथापि व्यापक
ताज्ञानस्य हेतुत्वे चैत्रीयज्ञानवान् महानसीयवह्निमान् इत्यनुमित्यनुपपत्तिः। चैत्रीयज्ञानत्वादेरखंडस्याभावेन स्व
रूपतस्तद्विशिष्टधर्मिकव्यापकतावच्छेदकत्वज्ञानासंभवात् चैत्रीयज्ञानत्वेन व्यापकतावच्छेदकत्वग्रहे चैत्रीयज्ञानत्व राम०
वत्त्वान् इत्येवानुमितिप्रसंगात्॥ इति ध्येयम्॥ यादृशरूपावच्छिन्नाधिकरणतात्वे हेतुव्यापकतावच्छेदकत्वधीस्तादृश ११

रूपावच्छिन्नविधेयताकानुमितिः फलमतो न कोऽपि दोषः॥ प्रतियोगिवैयधिकरण्यस्य व्यापकतायां निवेशमपेक्ष्य
साध्याधिकरणतायां तद्घटितहेतुव्यापकत्वस्य व्याप्तौ प्रवेशे लाघवादित्यपि वदन्ति॥ एतेनेति॥ एवकारेण केवला
न्वयित्वग्रहाद्न्यरूपेणानुमित्युत्पत्त्यावृत्तिप्रसंगो नेत्यर्थः॥ ननु गगनाभाववत्त्वादिना केवलान्वयित्वग्रहः शुद्धगगनाभा
वत्वादिप्रकारेणानुमितौ हेतुर्वाच्यः गगनाभाववत्त्वविशिष्टगगनाभावत्वप्रकारेणानुमितौ तु गगनाभाववत्त्वा
श्रयप्रकारेणैक्यकेवलान्वयित्वग्रहस्य हेतुत्वान्नैकदा तदवच्छिन्ननिरवच्छिन्नगगनाभावत्वप्रकारिताकानुमि
तिप्रसंगइति यदि ब्रूयात्तदाप्याह॥ सर्वजनेति॥ अग्रहमात्रव्यतिरेकेति॥ तदानीं केवलान्वयित्वग्रहसंपत्तये अन
थातत एव तत्रानुमितिसंभवादिति॥ नन्वेवं प्रमेयत्वादेरभावाप्रतियोगित्वग्रहदशायां घटादौ तद्वैशिष्ट्यावगाह्य
नुमितिर्न स्यात्प्रकारणाबाधादत आह॥ प्रमेयत्वादेश्चेति॥ तथा च तदानीं प्रमेयत्वादिसाध्यकानुमितिरसिद्धैवेति
भावः॥ ज्ञेयत्वादौ घटावृत्तित्वाग्रहदशायां सहचारस्य लाभावात्॰ केवलान्वयित्वेन घटादिवृत्तित्वानुमानासंभवात्

१२. 12 व्याहकथंचिदिति ॥ तथाचतद्वृत्तिपदार्किंचिद्धर्मव्यापकत्वेनसमंसाध्यस्यहेतुसहचारोज्ञात्यन्यत्वादौएवमसुलभइतितद्वृत्ति
धर्मत्वावच्छिन्नव्यापकत्वस्यहेतुत्वेतद्दोषतादवस्थ्यमतःकथंचिदित्युक्तं ॥ केचित्तु ॥ तद्वृत्तिधर्मव्यापकत्वंतन्मात्रवृत्ति
धर्मव्यापकत्वमन्यथाकेवलान्वय्यन्तरेघटादिवृत्तित्वाग्रहदशायांसहचारस्यग्रहाभावात्तथाहेतुग्रहदशायांसाध्यस्या
पिप्रायशोग्रहसंभवात् ॥ सिद्धसाधनमतःकथंचिदित्युक्तं ॥ तथाचतद्वृत्तित्वाग्रहदशायामेवानुमितिरितिभावइत्याहुः
॥ तदनुमितिःप्रमेयत्वादिसाध्यकानुमितिः ॥ अत्रेदमवधेयं ॥ व्यापकसामानाधिकरण्यज्ञानस्यहेतुत्वेपिवाच्यत्व
स्यव्यतिरेकित्वभ्रमदशायांतदभाववद्वृत्तित्वग्रहात्तत्साध्यकानुमित्युत्पत्तिसंभवेनकेवलान्वयिसाध्यकानुमिति
खंडनंदुर्घटंतार्किकैरस्यथरत्वात्पभ्युपगमात् ॥ नचवाच्यत्वादेःकेवलान्वयित्वग्रहदशायांवाच्यत्वाद्यभाववद्वृत्ति
त्वग्रहासंभवात्तदानींवाच्यत्वाद्यनुमित्यनुत्पादएवकेवलान्वयिखंडनशब्दस्यार्थइतिवाच्यं ॥ भिन्नप्रकारकज्ञानस्या राम०
विरोधितयासाध्यवृत्तिपदभावाप्रतियोगित्वादिरूपकेवलान्वयित्वस्यग्रहेपिप्रतियोगितासंसर्गकाभावेसाध्ये १२

शिष्ट्यावगाहिनः साध्याभाववद्वृत्तिर्हेतुरित्याकारकज्ञानस्योत्पत्तौ बाधकाभावात्· न चाभावे धर्मिणि साध्यतावच्छेद
कावच्छिन्नप्रतियोगित्वसंसर्गेण साध्यीयत्वाभावग्रहदशायां साध्याभाववद्वृत्तित्वग्रहासंभवात्· तदानीं वाऽसत्त्वाद्यनु
मित्यनुत्पादप्रसंग एव केवलान्वयित्वं दुर्गमिति संप्रत्त॥ अभावत्वसामानाधिकरण्येन तादृशसाध्यीयत्वाभावग्र
हेप्यभावधर्मिकस्य तादृशप्रतियोगितासंबंधेन साध्यीयत्वग्रहस्य संभवात्· अभावत्वावच्छेदेन तादृशसाध्यीयत्वाभा
वग्रहस्य चप्रमात्मकस्य दुर्घटत्वात्· संयोगादिसंबंधेन वाऽसत्त्वाद्यभावे तादृशसाध्यीयत्वाभावस्यासत्त्वात्· वस्तुतस्तु
अभावत्वविषयतामनन्तर्भाव्य साध्यतावच्छेदकावच्छिन्नप्रतियोगित्वसंसर्गेणायः साध्यीयस्तद्वद्वृत्तित्वज्ञानमे
वलाघवात्कारणमित्यभावत्वावच्छेदेन प्रतियोगितासंबंधेन साध्यीयत्वाभावभ्रमे सत्यपि तादृशज्ञानोत्पत्तौ बाधकाभा
वः धर्मितावच्छेदकविशेषान्तर्भावेनैव बाधबुद्धेर्विरोधित्वात्· यत्तु साध्यतावच्छेदकधर्मेण साध्यतावच्छेदकसं
बंधेन चावच्छिन्नं यत्प्रतियोगित्वं स्वरूपं तत्संबंधेनाभावे साध्यवैशिष्ट्यावगाहिन एव साध्याभाववद्वृत्तित्वज्ञानस्या

१२ नुमितिहेतुत्वं लाघवात् न तु साध्यतावच्छेदकधर्मावच्छिन्नत्वं प्रतियोगित्वं च विशिष्टविशेषणाभावापन्नमवगाहमानस्य
साध्याभाववदवृत्तित्वज्ञानस्य तथात्वं गौरवात् तथा च स्वरूपसंबंधेन वाच्यत्वत्वावच्छिन्नप्रतियोगिताकः केवलान्वी क
13 तया तत्संबंधेनाभावे वाच्यत्ववैशिष्ट्यावगाहिनो वाच्यत्वाभाववदवृत्तिज्ञेयत्वमित्याकारकज्ञानस्यापि केवलान्वीकत्वम
स्तु संसर्गस्यापि स्वातिनिरासाद् अतः कारणस्यैवबाधात् केवलान्वयिसाध्यकानुमानस्य खंडनमिति तन्न घटादि
पक्षकवाच्यत्वाद्यनुमितेरानुभविकत्वे वाच्यत्वत्वावच्छिन्नत्वं प्रतियोगित्वं त्वाभावांशे संसर्गमर्यादया विषयी कुर्व
णस्यैव वाच्यत्वाभाववदवृत्तित्वज्ञानस्यान्यथाख्यातिरूपस्य तत्र हेतुत्वसंभवेन कारणस्य संभवात् साध्यादिभेदे
नानुमितिव्याप्तिज्ञानयोः कार्यकारणभावभेदात् वह्न्याद्यनुमितौ वह्नित्वावच्छिन्नाखंडप्रतियोगिताकव्याप्तिसंबंधे
न वह्नीयाभाववदवृत्तित्वज्ञानत्वेन हेतुता लाघवस्य वाच्यत्वादिसाध्यकस्थलेऽकिंचित्करत्वात् तस्मात् केवला राम०
न्वयिनो वाच्यत्वादेः साध्यविषयानुमित्यनुभवो भाव एव केवलान्वयिखंडनपदार्थस्तु दुर्जयदीधितिकारैर्न तु ज्ञेयत्वा १२

दिहेतुकातदनुमितिरानुभविकीति॥एतेनसाध्यादिभेदेनव्याप्तिज्ञानानुमित्योःकार्यकारणभावभेदात्तत्वह्निवि
धेयकानुमितौवह्न्यभाववद्वृत्तित्वज्ञानस्यहेतुत्वेपिज्ञेयत्वादिलिंगकवाच्यत्वादिसाध्यकानुमितौयत्वादिव्या
पकवाच्यत्वादिसामानाधिकरण्यधियःकारणत्वेबाधकाभावःकार्यकारणभावानुपपत्तिभियातदुपेक्षणेद्रव्य
त्वादेरपिव्यनुमितिर्नस्यात्ःद्रव्यत्वादिविधेयकानुमितिंप्रतिद्रव्यत्वाद्यभाववद्वृत्तित्वज्ञानस्यकारणत्वान्तरकल्प
नायांगौरवात्ःद्रूपस्यापिवाच्यत्वादितिनिरस्तं॥द्रव्यत्वादिविधेयकानुमितेरानुभविकतयातत्रकारणान्तरक
ल्पनस्यप्रामाणिकत्वात्ःवाच्यत्वादिविधेयकानुमितेस्तत्रनिष्प्रामाणिकत्वात्ःतत्रविशेषतोपिव्यापकसामा
नाधिकरण्यधियःकारणत्वस्यैवानन्तमात्रकल्प्यत्वात्अन्यथानिर्वह्निधर्मिकवह्निविधेयकानुमितिमप्यंगीकृत्यत
त्रापिनिर्वह्निधर्मिकवह्निव्याप्यधूमवत्तापरामर्शस्यहेतुतायाःकल्पनापत्तेरितिदिक्॥छ॥ ॥केवलान्वयि
नंनिरस्यकेवलव्यतिरेकिणंनिरस्यतिःएवमितिःगौरवादित्यस्यसाध्याभाववद्वृत्तित्वग्रहापेक्षयेत्यादिःननुसाध्या

१४ भाववद्वृत्तित्वग्रहस्यैवव्यतिरेकव्याप्तिग्रहस्यापिव्यभिचारधीविरोधित्वेनहेतुत्वंसाधनीयमतस्तदाहव्यभिचारेतिः
15 स्यविरोधित्वमुत्पादयति·वन्ह्यभाववेति·वन्ह्यभाववतिधूमाभावोनास्तीतिधीरभावेधूमाभावप्रतियोगित्वावगाहिनी
धूमाभावेपिवन्ह्यभाववद्वृत्त्यभावप्रतियोगित्वमवगाहतेइतितस्याएवविरोधिधीविषयत्वमात्रेणव्यतिरेकव्या
प्तिग्रहेकदाचित्प्रतिबंधकत्वमुचितंवस्तुतस्तुतदप्ययुक्तंसंसर्गविधयाप्रतियोगित्वग्रहेप्रतियोगित्वाभावप्रका
रिकायाःव्यतिरेकव्याप्तिधियोविरोधित्वासंभवात्·वन्ह्यभाववतिधूमइत्येवंव्यभिचारग्रहेव्यतिरेकव्याप्तिग्रहस्य
प्रतिबंधकत्वंदूरपराहतं·वस्तुगत्याधूमाभावाभावात्मकस्यधूमस्यतत्रविषयत्वेपिधूमाभावाभावत्वेनाप्रकारक
त्वादिनाखंडनार्थेः ननुव्यतिरेकव्याप्तिग्रहोत्तरजायमानबुद्धेःप्रत्यक्षादिभिन्नायाअनुभवत्वेनानुमितित्वसिद्धौअत्रनायत्या
व्यतिरेकव्याप्तिज्ञानस्यतद्धेतुत्वंसेत्स्यतीत्यतस्तत्रैवबाधकमाहव्यतिरेकेत्यादि·तत्वेनानुमितित्वेन·क्रमिका राम०
नुमितिव्यक्तिषुपूर्वपूर्वानुमितौपरपरतेसत्त्वमतेपिप्रवृत्तिजनकानुमितौव्यभिचाराद्धेतुत्वंतस्मादाहलक्ष्मेति·सामग्री १४

ति॰ क्वचित्साध्याभाववदवृत्तित्वज्ञानं क्वचिद्व्यतिरेकव्याप्तिज्ञानं हेतुरित्येवं कल्पनायाः फलीभूतज्ञातेऽनुमितित्वा
नुभवाधीनत्वात्॰ तस्य च प्रकृतेऽभावादिति भावः। विजातीयेति॰ धीरित्यनुषज्यते॰ वैजात्यमर्थापत्त्याभिनानुमिनो
मीत्यनुभवादेव सिद्धं व्यतिरेकव्याप्तिग्रहस्य जन्यतावच्छेदकत्वेनैव तत्र सिद्धिः प्रत्यक्षादिभिन्नानुभवस्य तथात्वे गौ
रवादित्यपि वदंति॰ नन्वेवं साध्याभाववदवृत्तित्वस्य व्यतिरेकव्याप्तेश्च युगपत्परामर्शेऽनुमित्यर्थापत्त्योः संकरस्या
दतस्त्वाह क्लृप्तप्रमाणेति॰ तथा च प्रत्यक्षानुमित्योर्युगपत्सामग्रीसमवधाने यथानुभवसिद्धं तदेकतरसामग्र्याऽ
परसामग्रीप्रतिबंधकत्वं तथैव प्रकृतेपि तथैव वाच्यं। यद्वा परैर्ज्ञानद्वयस्यांगीकारात्॰ विजातीयज्ञानमेव तत्रो
त्पद्यत इत्याशयः। नातः प्रतिबध्यप्रतिबंधकभावकल्पनागौरवमपीति भावः। अनुत्पादादिति। पक्षताजन्यत्वे हे
तुः साध्यर्थापत्तिरपि लाघवेनेति॰ अन्वयपरामर्शसहितपक्षताजन्यत्वापेक्षयादुत्पादिः एवं पक्षताजन्यत्वमात्र
स्य प्रयोजकत्वे समवायसंबंधावच्छिन्नपक्षताजन्यत्वस्य प्रयोजकत्वे तथापक्षताजन्यत्वस्य वारणे संभवेपि वस्तुग

३५ तिमनुरुध्यसमाधत्ते दृष्टान्तासत्त्वेपीति ॥ प्रदेशान्तरे इष्टापत्त्या तस्याः पक्षताघा ॰ तिरस्तत्वादितिप्रमाणाभावेनेत्यादिः ॥ तथा
15 च दृष्टान्तासिद्धिरिति भावः ननु सिद्धिकालीनयोः प्रत्यक्षसामग्र्याः तत्र ग्राहकत्वे नानुमितौ प्रतिबंधकत्वकल्पनापेक्षया
लाघवादेव सिषाधयिषाविरहपक्षतायास्तद्धेतुत्वं सेत्स्यतीत्यत आह साध्यादावित्याद्यादिनासिषाधयिषोपग्रहः ॥ तथा च सा
ध्यभेदादि वाऽनुमितित्वार्थापत्तिपत्तित्वादिप्रकारकसिषाधयिषाभेदेपि पक्षतायाना नानात्वादनुमितित्वादिप्रकार
केच्छाविरहघटितपक्षताजन्यत्वं यदि प्रयोजकं तदार्थापत्तेः स्वरूपासिद्धिः स्वार्थापत्तित्वादिप्रकारकेच्छाविरहघ
टितपक्षताजन्यत्वस्य प्रयोजकत्वे चानुमितौ दृष्टान्तासिद्धिरिति भावः ननु अन्यपक्षातिरिक्तसाध्यज्ञानत्वप्रकारकेच्छा
विरहविशिष्टसिद्धित्वघटितधर्मावच्छिन्नाभावत्वेन निरुक्तपक्षताद्वयमनुगमय्य तज्जन्यत्वमेवानुमितित्वप्रयोज
कं वाच्यमतो नोक्तदोष इत्यत आह प्रयोजकत्वपदार्थवितर्क्य दूषयति प्रयोजकत्वं चेति ॥ वस्तुतोऽर्थापत्तित्वावच्छेदेन राम०
तत्सामानाधिकरण्येवाऽनुमितित्वस्य साधने पक्षताजन्यत्वस्य प्रयोजकत्वं तत्र नाघः इत्यत आह साध्यादी १५

ति॰ तथा च भागासिद्धिरिति हि भावः द्वितीये त्वाह प्रयोजकत्वं चेति॰ युक्तमुत्पश्यामः। प्रांचस्तु साध्यादीत्यादिपदेन
पक्षस्य परिग्रहः तेन साध्यपक्षादिभेदात्पक्षताया नानाव्याप्तिज्ञानत्वं नानुमितित्वप्रयोजकं समव्याप्तस्यैव प्रयोज
कत्वस्थितेरित्याशयः ननु व्याप्यमात्रे प्रयोजकत्वमास्थेयं तत्तत्पक्षसाध्यकानुमितित्वे व्याप्ततत्तत्पक्षसाध्यकपक्ष
ताज्ञन्यत्वं प्रयोजकं बाधमत उक्तं प्रयोजकत्वं चेत्याह। असंभवति अनुमितित्वनानेत्यत्वादिति भावः इत्या
दिरित्यादिपदेन व्यापकत्वमित्यादेः सूचनं। एतेन उक्तदिशा प्रयोजकत्वस्य निरस्तत्वेन। व्याप्तिज्ञानादीति अ
न्वयव्यतिरेकान्यतरव्याप्यवगाहिज्ञानजन्यत्वमित्यर्थः तेन न व्यासस्यननुगमनिबंधनासिध्यादिस्वयोंपपयामीत्य
नुभवस्य व्यतिरेकपरामर्शप्रयोज्यानुमितित्वावगाहित्वमंगीकुर्वतां व्यतिरेकव्याप्तिज्ञानस्थलेपि अनुमितित्वंक्ष
णाविलंबेन कल्पयतां सिद्धांतिनां मतमाह साध्याभावेत्यादि साध्यव्याप्यत्वस्य व्यक्तिभत्वगर्भत्वे तु गगनादौ व्यभि
चारवारणार्थं धर्मपदं अन्यथा तदुपरंजकं तद्बोध्यं जलत्वादौ धूमादिव्यापकत्वाव प्रतियोगिजलत्वादिपरामर्शोत्तर अ

१६ प्रसिद्धस्यधूमाद्यभावस्याश्रर्योपन्नात्तुक्तगात्यसंभवात्प्रसिद्धसाध्यकेत्वुक्तंस एवकेविदित्यत्राहस्वरसः समवायेनेति·
वर्त्तमानत्वादित्यत्रापि गुणवदिति· यद्यपिजातिसाध्यक एवसंयोगो नघटादिहेतावप्रसिद्धिः संभवति· तथापिसंबंध
16 विशेषेणावृत्तिमत्त्वमात्राप्रसिद्धिनिबंधनानुमानविलयप्रदर्शनायगुणवदितिसाध्यांतरमुक्तं· पूर्वत्रतुसमवेतत्वापे
क्षयाजातित्वस्यगुरुतयातदवच्छिन्नाभावाप्रसिध्यापिविलयसंभवादितिद्रष्टव्यं· उपदर्शयद्भ्रति· तथाचतत्रजात्या
दौसत्त्वादिहेतित्वानुमानमेवप्रमात्मकव्याप्तिज्ञानादितिभावः स्वाधिकरणेति· तथाचजात्यादिसामान्याभावस्यहे
तुभूतगुणादिमदवृत्तित्वान्नोक्तदोषइतिभावः ननुस्वाधिकरणावृत्तिसाध्याभावकत्वव्याप्तौस्वाधिकरणावृत्ति
त्वंनसंबंधसामान्येनवक्तव्यं जातिमान्द्रव्यत्वादित्यादावव्याप्तिः द्रव्यत्ववतिकाले जात्यभावस्यकालिकसंबं
धेनवृत्तेः नापिविशेषणतयाघटभिन्नंद्रव्यत्वादित्यादावतिव्याप्तेः साध्याभावस्यघटत्वादेर्विशेषणतयावृत्तित्ववि राम०
रहात् अभावीयस्वरूपसंबंधेनभावस्यवृत्तौमानाभावात् घटत्वाभावोघटेनास्तीतिबुद्धेः कुसुमसमवायेनैवसंभ १६

वात् नत्वाभाववत्वप्रतीतेः प्रमात्वानुरोधेन स्वमते ऽभावाभावस्यातिरिक्तत्वान्नैष दोष इति वाच्यं तथापि घटत्वाभा
वस्य कालिकसंबंधावच्छिन्नाभावसाध्येन गगनत्वादिहेतावव्याप्तिप्रसंगात् घटत्वाभावरूपस्य साध्याभावस्य वि
शेषणतया गगनवृत्तित्वात् अत एव न प्रकृतसाध्यवत्ताविरोधिताघटकसंबंधेन स्वाधिकरणावृत्तित्वनिवेशो
न युक्तः कालिकसंबंधेन गगनवृत्तित्वाप्रसिद्धेः उक्तस्थल एवाव्याप्तितादवस्थ्यात्सत्त्वाभावविरोधिताघटक
समवायसंबंधेन जातिवृत्तित्वाप्रसिद्ध्या सत्तामूर्त्तं जातित्वादित्यादावव्याप्तेः किंच द्रव्यसामान्याभाववान् जातिसा
मान्याभाववान् घटसत्ताघटान्यतरत्वादित्यत्राव्याप्तेः गगनाद्यात्मकस्य पटत्वाद्यात्मकस्य च साध्याभावस्य हेत्व
धिकरणावृत्तित्वात् न च साध्याभाववत्त्वावच्छेदेन स्वाधिकरणावृत्तित्वाभावो विवक्षितः स्वाधिकरणत्वावच्छेदेन
साध्यवत्त्वलक्षणं स्वव्यापकसाध्यसामानाधिकरण्यमपेक्ष्य गुरुत्वादिति चेन्न उक्तस्वरसेनैव साध्याभाववादेऽप
त्वादिपदस्योपन्यस्तत्वात् साध्यवत्त्वप्रकारकप्रमासामान्याभावस्य साध्याधिकरणतासामान्याभावस्य साध्यस

१७ 17 मानाधिकरणसामान्याभावस्यवालाभात्तयाचस्वाधिकरणावृत्तिसाध्यवत्त्वप्रकारकप्रमाविषयत्वसामान्याभाव
कत्वं·स्वाधिकरणावृत्तिसाधिकरणत्वसामान्याभावकत्वंस्वाधिकरणावृत्तिसाध्यसमानाधिकरणसामान्याभावक
त्वंवापर्यवसितंतत्रचस्वाधिकरणावृत्तित्वंसाध्यसामानाधिकरण्यंपतद्दवच्छिन्नाभावस्वविशेषणताविशेषेणैववा
च्यमतोनकश्चिद्दोषः साध्याभाववद्वृत्त्यधिकरणावृत्तिसाध्यसमानाधिकरणसामान्याभावकत्वंवापर्यवसितं
तत्रचस्वाधिकरणावृत्तित्वंसाध्यसामानाधिकरण्यंपतदवच्छिन्नाभावस्वविशेषणताविशेषेणैववाच्यमतोनक
श्चिद्दोषः साध्याभाववदवृत्त्यधिकरणतानिरूपकतावच्छेदकधर्मत्वेतात्पर्यमित्यपियिकश्चित्·नन्वेवंस्वत्वप्रवेशे
हेतुभेदेनंतकार्यकारणभावापत्तिरतस्त्याज्यस्वत्वेति·प्रणिवृव्यापकसामानाधिकरण्यव्याप्तिस्वीकारदशायामेव
स्वहस्तितत्वादित्यस्यमवद्विरित्यादि·अस्माभिस्तुहेतुमनंतर्भाव्यसाध्याभाववदवृत्तित्वज्ञानस्येवहेतुत्वंस्वी राम० १७
क्रियतइतिभावः।एतेनस्वाधिकरणारवृत्त्यादिक्रमेणैवव्याप्तिनिर्वचनेन·यरास्तमित्यप्योऽस्तव्ययंः नीलतरेति·

अत्रनीलरूपवान्नीलसमवेतत्वेसतिगोत्वादित्यस्यैवसम्यक्त्वेसाध्यसाधनकोटावभावप्रवेशोविफलइतिचिं
त्यं।विशेष्यस्यगोत्वस्यव्यभिचारित्वान्नीलगवादौविशिष्टहेतोरिति॰स्वमतेतुविशिष्टगोत्वादेःकेवलान्वयिनःप
क्षिप्रसाध्यत्वमेवेत्याशयेनाहपरंपरेति॰विशेष्यविशेषणयोःप्रत्येकाधिकरणताद्वयमेवविशिष्टवत्त्वप्रती
तेर्विषयः।अतएवप्रत्येकाधिकरणत्वस्याभावनिश्चयेनविशिष्टवत्त्वबुद्धिरिति प्राचांमतेविशिष्टनिरूपिता
धिकरणताप्रसिद्धेःआहपरंपरेत्यादीत्यादीत्यपिवदन्ति।परंपराचात्रयावत्त्वाश्रयाधिकरणत्वमेवच्छेदक
त्वाख्यस्वरूपसंबंधोबोध्यः।तत्रेतियत्रविशिष्टस्यव्याप्यत्वव्यवहारःतत्रविशेषणविशेष्यसंबंधस्यैवव्याप्य
त्वग्रहादनुमितिरितिभावः।ननुयत्रव्यतिरेकसहचारेणव्याप्तिग्रहस्तत्रव्याप्तिपदस्यव्याप्तिरेकव्याप्तिमा
त्रपरत्वेव्यतिरेकसहचारेणान्वयस्यवैयर्थ्यम्अन्वयव्याप्तिपरत्वेचननिरुक्तसाध्यप्रसिद्धिमत्त्रांकानुत्थानापत्तिरतआ
हसाधारणेति।तथाचव्याप्तिग्रहपदमनुमितिकारणपरमतोनग्रंथद्वयानुपपत्तेरितिभावः।साधारणोत्प

१८ 18 त्तिरिति पाठे स्वान्वयव्यतिरेकि वारणाय व्यतिरेकि सहचारेष्वेवेत्यवधारणामंतर्भाव्य उक्तमित्यर्थः व्याप्तिग्रहपदमनुमिति
जनकज्ञानपरमेवतत्त्वापीतिभावः कुमीमांसकैः केवलान्वय्यनुमानस्वीकारात्तत्र व्याप्त्यभिधानं तस्माद्विरुद्धमतः
पूरयति-तवेति-नैयायिकस्येत्यर्थः तथा च न्यायमतानुसारेणैव तन्मतास्कंदितमिति भावः। स्वव्यापकसाध्यसा
मानाधिकरणपरूपान्वयि व्याप्तिसाध्यत्वेन तदप्रसिद्धौ साध्याप्रसिद्धिप्रसिद्धौ वानुमानवैफल्यमतो व्याचष्टे साध्यव्या
प्यत्वमिति· स्वंततदिति· साध्यव्याप्यांतरस्याप्रतिसंधानदशायामपि कृत्स्नमिहपाधित्वज्ञानस्य व्याप्तिग्रहप्रस
हेतुत्वात् स्वाहनिरूपाधीत्यादि· पृथिवी विशेष्यकेत्यभिधानात् समानाकारकसिद्धेरनुमितिविरोधित्वं मूला
भिप्रेतमित्याशयेन प्रकृतसिद्धेरनुमितिसमानाकारत्वमेव नास्तीति व्युत्पादयति पृथिवीत्वमित्यादिना· तदव
च्छेदेन पृथिवीत्वावच्छेदेन· इतरभेदो भासतेइति· पूर्वेणान्वयः। ननु पृथिवीत्वेन पक्षतायामप्युक्तदिशा सिद्धसाध राम०
नासंभवात् सर्वेति पक्षताविशेषणं। त्यर्थमतस्वाह सर्वेति चेति तथा चानुमितौ न सर्वत्वं प्रकारः। ननु पृथिवीत्व १८

त्वं पृथिवीतरावृत्तित्वे सति सकलपृथिवीवृत्तित्वं । तथा चाभाववति पृथिवीत्वे हेतोः पक्षधर्मतालाभात् उपनयस्य
कथाखलत्वैयर्थ्याभिधानात् दर्शं पृथिवीत्वं हेतुरेव न तु त्वाहमत्रचेति । तन्निवृत्ति व्यतिरेकव्याप्तेर्गमकत्वमभ्युपेत्य
कदाचिद्धेतुपर्यवसिर्हेत्पन्नतिप्रयोजकत्वादितिभावः सकलपृथिवीवृत्तित्वस्य हेतोः प्रवेशेऽपि न क्षतिः यद्रूपाव
च्छिन्ने व्याप्तिर्गृहीता तद्रूपावच्छिन्नस्य पक्षधर्मताया उपनयादेव लाभात् साकल्यस्य व्यापकत्वानतिरेके साध्ये पृथिवी
त्वव्यापकत्वपर्यवसन्ने सकलपृथिवीवृत्तित्वपक्षधर्मत्वस्याप्रवेशाच्च । इत्यावेदयितुमित्यपतो यीत्यपिकार उक्तः
पदार्थोपस्थित्यादीत्यादिना वाधविरहाग्रहः तन्मते तावत्पदार्थोपस्थित्यादिसत्त्वे । तद्विहेपीति जलादौ धू
माभाववन्त्वभावयोः सहचारग्रहेऽपि तत्प्रायः पिंडे व्यभिचारसंशयात् न तु यदधिकरणावच्छेदेन सहचारधीस्तदं न
तमविरोधिव्यभिचारग्रहे प्रतितत्स्यविरोधित्वं वाच्यं मतमाह अधिकरणविशेषेति । साधनसाध्याभावान्यत
रवत्तानिरूपितेऽधिकरणे चेत्यर्थः तन्निवृत्तौ व्यभिचारशंकानिवृत्तौ साध्यवत्त्वेति । साधनवत्त्वेति निश्चितेऽधिकर

१९ रोसाध्यवत्त्वग्रहस्यैवसाध्याभाववत्त्वेन नीर्णीतेऽधिकरणीचसाधनाभाववत्त्वग्रहस्यैवव्यभिचारशंकानिवर्त्त
19 कादित्यर्थः। ननु व्यतिरेकसहचारज्ञानत्वेन व्यभिचारधीविरोधिज्ञानत्वेन वा व्यतिरेकसहचारग्रहस्यान्वयव्या
प्तावहेतुत्वेऽपि विशेषणाज्ञानविधया तद्धेतुत्वमस्त्येव तथा चान्वयसहचारग्रहाऽजन्यव्यतिरेकसहचारग्रहाज
न्यान्वयव्याप्तिग्रहत्वरूपं केवलव्यतिरेकित्वं सुवचमेव नचान्वयपदस्य सहचारज्ञानस्यान्वयव्याप्तिघटकतयात
द्ग्रहाजन्यत्वमन्वयव्याप्तिग्रहस्यासंभवीतिवाच्यं। यत्रान्वयव्याप्तिघटकवस्तूनां प्रत्येकोपस्थितौ विशिष्टवैवि
शेषणाभितिन्यायेनान्वयव्याप्तिधीस्तत्रैवाचयसहचारत्वप्रकारकग्रहाजन्यत्वसंभवात् तनाहु

राम:
१९